संस्थापक-संपादक:
स्व. डॉ. श्री. भा. वर्णेकर

वर्षम् ६५, अङ्कः ५०
शनि. दि. २७ फेब्रुवारी २०१६, माघ कृ. ४ शके १९३७, युगाब्द ५११७

ISBN 978-0-00-000978-4
13 Digit ISBN : 978-1-890041-04-5
Barcode ISBN : 978-0-00-000978-4:18900

प्रबन्धिका
डॉ. प्रज्ञा देशपाण्डे
prabandhika.sanskbhavitavyam@gmail.com

प्रकाशक:
डॉ. चन्द्रगुप्त वर्णेकर
०९३७०८०३९१३
cswarnekar@gmail.com

संस्कृत-भवनम्,
२, पश्चिम: उच्च-न्यायालय-मार्ग:, नागपुरम् - ४४० ००१.

www.sanskritbps.org

संस्कृत-भवितव्यम्

● निरन्तरं पञ्चषष्टिवर्षाणि प्रकाश्यमानं विश्वस्य एकमेव संस्कृतसाप्ताहिकम् ●

संस्कृत-भाषा-प्रचारि-सभायाः मुखपत्रम्

अङ्क-मूल्यम् रु. ५/- वा. शु. : रु. २५०/-	PRINTED MATTER	वृत्तपत्र-पञ्जीयन-संख्या RN 11454/57
Core Banking Facility : **Name :** Sanskrit Bhasha Pracharini Sabha **A/c No. :** 30362855441 **IFSC/CIF Code :** SBIN0004872	डाकप्रेषण पञ्जीयनसंख्या NGP-27 Postage Licence No. 9 संपादिका: **डॉ. लीना रस्तोगी** सहसंपादिकाद्वयम्: **डॉ. वीणा गानु, डॉ. शारदा गाडगे**	

■ **सुसम्पन्नः षष्ठः दीक्षान्तसमारोहः** कालिदास-संस्कृत-विद्यापीठस्य शनिवासरे २० फेब्रुवारीदिनाङ्के रामटेकनगरे। प्रमुखातिथिद्वयं **डॉ. परमेश्वर-नारायणशास्त्री** (कुलगुरुः राष्ट्रियसंस्कृतसंस्थानस्य), डॉ. सन्तोषः पाण्डा (केन्द्रशिक्षाविभागस्य) च प्रसङ्गेऽस्मिन् समुचितं मार्गदर्शनं कृतवन्तौ। कुलगुरुः **डॉ. उमावैद्यवर्या** अध्यक्षपदं भूषितवती।

■ **हरियाणाप्रान्ते माघमासे होलिकादहनम्!** जाटजातेः आरक्षणान्दोलने १९ जनाः हताः, बहूनि यानानि, गृहाणि, इन्धनस्थानकानि, रेलस्थानकानि च चण्डाग्निना भक्षीकृतानि। आहत्य हानिप्रमाणं विंशतिसहस्रकोट्यधिकरुप्यकमूल्यमिति अनुमीयते।
(कृपया सम्पादकीयं द्रष्टव्यम्)

■ **कश्मीरे पाम्पोरभागे राजकीये भवने प्रच्छन्नाः दुष्प्रवेष्टारः मृताः।** एते लष्कर-ए-तोयबासदस्याः शुक्रवासरे १९ फेब्रुवारीदिने जम्मू-श्रीनगरराष्ट्रियमहामार्गे अकस्मात् दुष्प्रवेशं कृतवन्तः। सङ्घर्षेऽस्मिन् षट् भारतीयसेनानिनः, एकश्च नागरिकः वीरगतिं प्राप्तवन्तः।

■ **अर्थसङ्कल्पाधिवेशनस्य प्रारम्भः** संसदः सदनद्वयस्य भौमवासरे २३ फेब्रुवारीदिने राष्ट्रपतेः उद्बोधनेन अभवत्। प्रभुणा रेलमन्त्रिणा २५ फेब्रुवारीदिने रेलार्थसङ्कल्पः प्रस्तुतः। २१ दिनाङ्के च वार्षिकार्थसङ्कल्पः प्रस्तुतः भविता। मध्ये २४ दिनाङ्के मानवसंसाधनमन्त्री स्मृति इराणी भावपूर्णं वास्तवं निवेद्य 'जेएन्यू', 'रोहित' इति घटनाद्वयस्य सत्यं सभागृहे प्रस्तुतवती। सर्वे विरोधकाः निष्प्रभाः सञ्जाताः।

■ **द्विदिवसीयसमाजोपयोगिविशिष्टव्याख्यानमाला** - देवसायुज्यसंस्कृतप्रतिष्ठानेन श्रीओरोबिन्दो सभागारे द्विदिवसीयविशिष्टव्याख्यानमालायाः आयोजनं अस्य मासस्य १८-१९ दिनाङ्कयोः कृतमासीत्। आयोजितायां द्विदिवसीयविशिष्टव्याख्यानमालायां विविधविषयाणामुपरि चत्वारि व्याख्यानानि अभवन् यथा - १८.२.२०१६ तमे दिनाङ्के १) मृत्योः आनन्दः, वक्ता - श्री देवलशास्त्री, २) वर्तमानकाले वास्तुशास्त्रस्य उपयोगिता अनिवार्यता च, वक्ता - श्री कनुभाई पुरोहितः, १९.२.२०१६ तमे दिनाङ्के १) प्राचीनभारतीयविज्ञानपरम्परा, वक्ता - श्री हसमुखः जाधवः, २) आधुनिककाले ज्यौतिषशास्त्रस्य उपयोगिता अनिवार्यता च, श्रीमती धाराजोशी। व्याख्यानमालायाः उद्घाटन-समारोहे अध्यक्षत्वेन **प्रो. प्रदीपसिंह चूण्डावत**महोदयः आसीत्। (डिन, फेकल्टी ओफ आर्टस्, का. प्राचार्यः, बरोडासंस्कृतमहाविद्यालयः, म. स. विश्वविद्यालयः, वडोदरा) व्याख्यानमालायां प्रो. प्रदीपसिंहमहोदयः उक्तवान् यत् संस्कृतेन एव भारतस्य उन्नतिः इति। उद्घाटकरूपेण **श्री जिग्नेश सोनी** (सिन्डिकेट सदस्यः म. स. विश्वविद्यालयः) च उपस्थितः आसीत्। उद्घाटन-प्रवचने श्री जिग्नेशसोनी महोदयेन उक्तं यत् संस्कृतशास्त्राणां व्याख्यानमालायाः आयोजनं सामान्यजनानां कृते सदा सर्वदा भवेत्, तेन सामान्यजनाः संस्कृतशास्त्राणां विषये ज्ञास्यन्ति। औद्घाटनिकं सत्रम् वैदिकमङ्गलगीत्या आरब्धम्। मञ्चस्थैः अतिथिभिः, देवसायुज्यसंस्कृतप्रतिष्ठान-अधिकारिभिः च मङ्गलदीपप्रज्वालनानन्तरं भगवत्यै सरस्वत्यै कुसुमाञ्जलयः समर्पिताः। मञ्चाधिष्ठितानामतिथीनां सत्कारानन्तरं देवसायुज्यसंस्कृतप्रतिष्ठानस्य **डॉ. प्रफुल्लपुरोहितेन** स्वागतमभिनन्दनं समाचरता व्याख्यानमालायाः तथा देवसायुज्यसंस्कृतप्रतिष्ठानस्य विवरणं संक्षेपेण समुपस्थापितम्।

व्याख्यानमालायाः द्वितीयदिने समारोपवचने डॉ. प्रफुल्लपुरोहितेन उक्तं यत् अस्माकं शास्त्राणां उपयोगः केवलं कर्मकाण्डक्षेत्रे आध्यात्मिकक्षेत्रे वा दरीदृश्यते। शास्त्रपरम्परायाः प्रचारः प्रसारः संरक्षणं च सर्वैः मिलित्वा निरन्तरं करणीयम्। संस्कृतशास्त्राणां विषये सामान्यजनः अनभिज्ञः वर्तते। अस्माकं शास्त्राणि विश्वस्य कृते प्रेरकाणि सन्ति। शास्त्रेषु यद् अस्ति तद् बहिः आनेतव्यम्। तेन सामान्यजनः अपि अवगन्तुं शक्नोति। संस्कृतशास्त्रैः मानवसमाजस्य कल्याणं कर्तुं शक्यते। शास्त्रेषु कल्याणस्य कामना विहिता। कार्यक्रमस्यान्ते **डॉ दीपेन्द्रसिंहेण** धन्यवादज्ञापनं विहितम्।

तावदेव प्रतिष्ठा स्याद् भारतस्य महीतले।
ज्ञानामृतमयी यावत् सेव्यते सुरभारती॥

सम्पादकीयम्

हरियाणाप्रान्ते अकाण्ड-होलिकादहनम्!

गच्छति शिशिरशैत्ये, समागच्छतः वसन्तविभवस्य स्वागतं व्याहर्तुं भारते सर्वत्र प्रवर्तते होलिकादहनेन सहैव रङ्गोत्सवः। कतिपयवर्षपूर्वं पञ्चनदप्रान्तस्य सङ्गरूरनगरसमीपे एकस्मिन् महाविद्यालये तादृशः चैतन्यपूर्णः होलिकोत्सवः स्वयं लेखकेन अनुभूतः। परं हा हन्त! ऐषमः वसन्तोत्सवपूर्वमेव विपरीतं होलिकादहनं, रक्तवर्ण-सिञ्चनैश्च हिंसात्मकः जातीयः रङ्गोत्सवः हरियाणाप्रान्तेन अनुभूतौ। माघे एव विकृतं फाल्गुनपर्व समाचरितं जनैः। निमित्तमासीत् जाटजातेः कृते शिक्षाक्षेत्रे, प्रशासनसेवायां च आरक्षणमिति। बहूनि रेल-बस-कार-द्विचक्र-यानानि, गृहाणि, रेलेन्धनस्थानकानि च रोषाग्निना भस्मीकृतानि। उपविंशतिजनाः मृताः, सहस्राधिकाः च बाधिताः; नैके मार्गाः अवरुद्धाः, सेनाबलप्रयोगश्चापि सञ्जातः। अनेन अनावश्यकेन हिंसात्मकेन विकृतेन जनान्दोलनेन किं साध्यमिति विचारणीयम्।

आरक्षणनीतेः ऐतिह्यं किञ्चित्

भेदतन्त्रमवलम्ब्य तत्कालीनैः आङ्ग्लशासकैः भारतीय-समाजे जातिभेदानुसारिणी आरक्षणनीतिः (कम्युनल ॲवार्ड) प्रस्थापिता। एकसंध-भारतीयसमाजस्य कस्मैचित् दुर्बल-घटकाय शिक्षाक्षेत्रे, प्रशासने च विशेषमर्थसाहाय्यं, स्थानं च तैः प्रदत्तम्। एतस्य समाजभेदितन्त्रस्य विरोधः स्वयं राष्ट्रपित्रा महात्मागान्धिनाऽपि कृतः आसीत्। यतोहि आरक्षणेन लाभान्विता जातिः आङ्ग्लशासनगृहीता भवति स्म। अर्थस्य पुरुषो दासः इत्यनेन न्यायेन आङ्ग्लशासकैः सेवकपरिवारः परिवर्धितः। प्रायः ईसवीये १८८० तमे वर्षे प्रारब्धा इयं सर्वकारीयारक्षणपद्धतिः १९३३ तमे वर्षे 'ॲवार्ड'-रूपेण विधिवत् पुरस्कृता सञ्जाता। स्वातन्त्र्योत्तरेऽपि काले १९५० तमे वर्षे अस्माकं संविधानेन, ततश्च १९८० तमे वर्षे मण्डल-कमिशन् द्वारा तादृश्या एव आरक्षणनीतेः विशेषावलम्बनं निर्धारितमभवत्। अनुसूचितजातयः, अन्यान्ये क्षीण-घटकाः च अधिकाधिकमात्रया लाभान्विताः सञ्जाताः। एवं वस्तुतः भारतीय-समाजस्य दुर्बलाङ्गानां विकासस्य सुयोग्यं उद्दिष्टमत्र अपेक्षितमासीत्। परं कालान्तरेण अनया योजनया जातीयं, राजकीयं स्वरूपं दुष्प्राप्तम्। परकीयैः आङ्ग्लशासकैः उप्तं तद् विषबीजं सम्प्रति विशालो विषवृक्षो भूत्वा समाज-पर्यावरणं दूषयति। गुजरात-राजस्थान-हरियाणा-प्रान्तेषु एतादृशं विषवमनं दरीदृश्यते, अन्यत्रापि सम्भविष्यति।

आरक्षणपद्धतेः विशिष्टकालमर्यादा स्यात्, तथा च तदारक्षणं पञ्चाशत्प्रतिशताधिकं मास्तु इति संविधानस्य, सर्वोच्च-न्यायालयस्यापि आदेशः वर्तते। हरियाणाप्रान्तेन ४९.५ प्रतिशतम् आरक्षणं पुरा एव प्रदत्तमस्ति। अतः जाटसमाजस्य २० प्रतिशतारक्षणमस्य अपेक्षा अन्यायपूर्णा भवितुमर्हति। एतदर्थे अकाण्ड-ताण्डवं, यान-गृह-कार्यालयानां दहनं हिंसा वा सर्वथा असमर्थनीयं भवति। एषः जाटसमाजः प्रायः शूरः, वीरः, धनी, प्रशासकः वरीवर्ति। नैषः दुर्बलघटकः। प्रचोदकाः कूटनीतिमवलम्ब्य राज्ये राजकीया-स्थिरतां साधयन्ति।

आरक्षण-विषये कूटनीतिः

एकसङ्घे भारतीयसमाजे जात्याधिष्ठितम् आरक्षणं प्रस्तूय परकीयैः आङ्ग्लशासकैः यत् भेदतन्त्रं प्रारब्धं तत् स्वातन्त्र्योत्तरकाले राजकीयक्षेत्रे मूलधनरूपेण स्वार्थाय उपयुज्यन्ते केचन राजनीतिपक्षाः। एतदर्थे डॉ. बाबासाहेब अम्बेडकराणां संविधानस्य च दलितसमाजस्य विकासस्य च मूलोद्देशः अपि अविगण्यते एभिः पक्षोपपक्षैः। 'अहिंसा परमो धर्मः' इति संसूचयतः बौद्धमतस्य अवमानना हिंसाचारेण साधयन्ति एते पक्षाः। तादृशस्य विपरीतस्य प्रचारस्य दुष्परिणामः भारते सर्वत्र दरीदृश्यते। हरियाणाप्रान्ते अकाण्ड-होलिकादहनमस्यैव परिपाकः। 'द्वेषाग्निः यथेष्टं प्रसार्य जीव-वस्तु-हानिम् अत्यधिकमात्रया भवतु' इति एतादृशी द्वेषपूर्णा सूचना, तत्र पूर्वमुख्यमन्त्रिणा सचिवेन वारं वारं प्रसारिता, दुर्जनाश्च आन्दोलनाय प्रचोदिताः इति वास्तवमधुना चर्चाविषयः सञ्जातः। तादृशमेव जनान्दोलनम् आरक्षणवादमवलम्ब्य अचिरादेव गुजरातप्रान्तेन, तत्पूर्वं च राजस्थानेन अनुभूतम्। एतेषु प्रान्तेषु कॉङ्ग्रेस-समाजवादी-वामपन्थी-बहुजनसमाजपक्षीयाः विरोधकाः सन्ति। सम्प्रति ते जनाधारहीनाः स्युः। अतः 'घटं भिन्द्यात् पटं छिन्द्यात्' इति येन केन प्रकारेण राज्येषु अशान्ति-प्रसारः एतैः पक्षोपपक्षैः स्वीकृतोऽस्ति। तथापि जागरूकः भारतीयसमाजः तादृशीं कूटनीतिं सम्यक् अवगम्य दुराचारिणः दण्डयितुं समर्थः वर्तते। दलितकूटनीतेः कृते भारतीयराजनीतौ स्थानं नैव लभ्यते। दालित्यमाश्रित्य राजकीयस्वार्थं साधयन्ती धनलोभेन च प्रसृता सा माया अस्यामेव द्वेषाग्नौ होलिका इव भस्मीभवेदित्यत्र नास्ति संशयालेशः। इति शम्!

— डॉ. चन्द्रगुप्त वर्णेकरः

सर्वस्पर्शात्मकः सहस्रांशुः

प्रतिदिनम् अखिलजगति सर्वे प्राणिनः यं प्रतीक्षन्ते, यस्य दर्शनेन प्रसीदन्ति च सः विश्वस्य पूषा सूर्यभगवानेव नभसि प्रकाशते।

चित्रं देवानामुदगादनीकं
चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावा पृथिवी अन्तरिक्षं
सूर्य आत्मा जगतस्तस्थुषश्च॥

ऋग्वेदस्य प्रथममण्डले एवं सवितृसूक्ते सः सर्वप्राणिनाम् आत्मा अस्ति इति स्तुतः।

प्राक् ऋग्वेदकाले भारतीयैः सूर्यस्य महत्त्वं ज्ञातम्। न केवलं भारते अपि तु अखिलजगति सर्वैः सः पूज्यते अतः सूर्यः वैश्विकदेवता इति मन्यते।

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान्।
सुवर्णसदृशः भानुः हिरण्यरेताः दिवाकरः॥

एतैः विविधैः अर्थपूर्णनामभिः सूर्यस्य महत्त्वं वर्णितं। सर्वचराचरसृष्टेः आत्मरूपतत्त्वमेषः। चैतन्यरूपेण सूर्यदेवः सर्वेषु प्राणिषु, अवकाशे, विद्युति, जले, मृत्तिकासु, उप्तेषु बीजेषु च इति सर्वत्र विराजते।

अदितिकश्यपयोः अयं पुत्रः प्रतिदिनं पूर्वापरदिग्भागे भ्रमत्येव। तेनैव जीवसृष्टिः जीवति।

'सूर्य रश्मिः हरिकेशः पुरस्तात् सविता, ज्योतिरुदया अजस्रम्।' एवं तस्य अक्षरतेजसः वर्णनं गायन्ति ऋषयः। अस्य वैभववृत्तं विशालमस्ति।

सौरशक्तिः जीवनाय बहूपयोगिनी इति सिद्धमस्ति। सूर्यस्य उष्णतया एव सागरजलात् लवणं प्राप्यते। लवणेन विना भोजनमस्वादु भवेत्।

सूर्यस्य सर्वस्पर्शित्वं, सर्वात्मकत्वं, सर्वसमावेशकत्वं चैतन्यप्रदमेव।

सूर्यकिरणेभ्यः अतिनीलकिरणाः (Ultra-Violet Rays) प्राप्यन्ते। ते रोगनिवारकाः। अतः रोगचिकित्सायै उपयुक्ताः। पण्डुरोगः, विविधाः त्वग्रोगाः, कुष्ठरोगः इत्यादयः निर्वार्यन्ते।

दशम मण्डलस्य ऋक् अस्य प्रमाणमस्ति -

येन सूर्य ज्योतिषा बाधसे तमो जगश्च विश्वमुदिसर्षि भानुना।
तेनास्मत् विश्वाम निरामनाहुतिमपामीवामप दुःस्वप्न्यम् सुव॥

अर्थ - येन सूर्यस्य तेजसा बाधसे तमः जगत् च विश्वम्, उद्गमयसि भानुना तेन अस्मत् अन्नाभावम् अनाहुतिम्, रोगजालं च दुःस्वप्न्यम् अपगमय।

एवमियम् प्रार्थना सूर्यस्य। तथैव

ॐ भूः भुवः स्वः, ॐ तत्सवितुर्वरेण्यम्।
भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥

अनया गायत्रीमन्त्रस्य प्रार्थनया बुद्धिप्रेरणायै याचना क्रियते।

भगवतः सूर्यस्य स्वच्छतेजःपूर्णः प्रकाश इव सर्वेषां मनांसि स्वच्छतेजःपूर्णानि भवेयुः एतदर्थमियं प्रार्थना प्रतिदिनं सश्रद्धं गेया -

सविता पश्चात्तात्, सविताऽधरात्तात्।
सविता नः सुवतु, सर्वतातिं सविता,
नो रासतां दीर्घमायुः॥
इति शं नो भव॥

● श्रीमती मीना पागे

जीवनं वृथा

ह्यस्तन उदयोऽद्यतनं पतनम्
जीवनं वृथा बुद्बुदोपमम्॥

संशये सदा यात्राऽऽरब्धा
कीर्तिः कौलीनैः सन्दृब्धा
प्रत्यूहैर्निचितमभूद्यतनम्
जीवनं वृथा बुद्बुदोपमम्॥१॥

एकाकि नागतं क्वापि सुखम्
ध्रुवमानिनाय किञ्चिद्दुःखम्
विषबिन्दुच्छुरितं यथाऽमृतम्
जीवनं वृथा बुद्बुदोपमम्॥२॥

उत्कोच इवाऽहं सञ्जातः
स्वार्थान्धकरे सायं प्रातः
तुल्यं मम कृते गृहं विजनम्
जीवनं वृथा बुद्बुदोपमम्॥४॥

त्यक्ता नु कियन्तो निर्मोकाः
अपगतास्तथापि न ते शोकाः
प्रतिपदं समुत्थं कदर्थनम्
जीवनं वृथा बुद्बुदोपमम्॥५॥

पश्याम्यधुना विगलन्मोहम्
भावये मनसि सोऽहं सोऽहम्
प्रतिदिशं परीतं निरञ्जनम्
जीवनं वृथा बुद्बुदोपमम्॥६॥

● डॉ. अभिराजराजेन्द्रमिश्रः
पूर्वकुलपतिः, सिमला (हि.प्र.)

पाठकस्य पत्रम्

नमामि मित्रं विश्वासं दण्डवदुपकारिणम्।
अज्ञाततटिनीनाथतारणसेतुरूपिणम्॥
मुहुर्नमामि सत्काव्ययामिनीयामिनीपतेः।
श्रीश्रीधरकवेः पुत्रं चन्द्रगुप्तमहं मुदा॥

आदौ आत्मनः परिचय -

अस्मि सुहासाख्यो बेङ्गलूरुनिवासी भारतीयविज्ञानसंस्थायां (IISc) विद्यार्थी काव्यरसिकश्च यस्य गीर्वाणवाण्यां महती आस्था।

श्रीधरकवेर्विषये शतावधानिगणेशमुखात् पूर्वमेव प्राप्त-परिचयस्य मे इदानीं पर्यन्तं नासीन्मार्गः तत्काव्यास्वादनाय। सम्प्रति विश्वासस्य यत्नैरुद्घाटितो मार्गः। श्रीशिवराज्योदयं पठितुमारब्धवतो मम युगपन्मोमुद्यते चेखिद्यते च चेतः। तद्रसप्लवेन मोदः। किन्तु तद्विषये निबन्धानामभावात् (विशेषतोऽन्तर्जाले), लोकोऽपरिचितकविरिति खेदः। अतः श्रीधरकविं तत्कृतीश्चाधिकृत्य लघुनिबन्धमेकं लिलिखिषु-रस्मि। यथा सूचितं विश्वासेन, Swarajya पत्रिकायां संस्कृतकाव्यविषये लिखामि। अयं लेखस्तत्र स्थापनमर्हति। अन्यत्रापि अर्हति। लेखेऽस्मिन् कवेर्जीवनं व्यक्तित्वं मनोधर्मः तत्कृतिभ्यश्चितानि रसमयपद्यानि सानुवादानि च प्रस्तोतुं मतिः। अत्र भवत्साहाय्यं याचे। दूरवाणीद्वारा वा Skype द्वारा वा कवेर्जीवनं सङ्क्षेपेण वर्ण्यते चेल्लिखितुं शक्नोमि। आङ्ग्लसंस्कृत-हिन्दीभाषासु एतादृशा लेखाः पूर्वं प्रकाशिताश्चेत् सूच्योऽहम्।

सकुटुम्बस्य भवतः शुभाकाङ्क्षी,
सुहासः

असौ सुहासो मम मित्ररत्नम्
काव्यप्रचारं रसनं विहाय।
तल्लेखनं चाऽपि करोति दक्षः
कृतीः प्रदत्ता अथ केचिदत्र॥
हन्त! दोषोऽत्र निवारणीयः
लेखाः प्रदत्ता अथ काश्चिदत्र।

- विश्वासो वासुकिजः

नासायां (NASA) संस्कृताध्ययनकथा वितथेत्यज्ञान-ध्वान्तनिवारणे करणीये भवद्भिः, ''नासायां संस्कृताध्ययनं प्रचलतीत्यप्रामाणिकवार्ताप्रचारो'' दोषायते ननु? वराह-मिहिरादीनाम् अध्ययनमिति स्वरुच्या क्वचित् स्यान्नामेतिहास-रुचिषु, नान्यथाऽस्ति।

- विश्वासः
अमेरिकादेशात् गणपत्रेण

वार्ता:

'दिल्ली-विश्वविद्यालयस्य दक्षिण-परिसरस्थस्य श्रीमोतीलाल-नेहरू-महाविद्यालयस्य संस्कृत-विभागेन आयोजिते एकस्मिन् संस्कृत-कार्यक्रमे बहुविधाः प्रकल्पाः समुपकल्पिताः। कार्यक्रमारम्भे **जवाहर-लाल-नेहरुविश्वविद्यालयस्य संस्कृताध्ययन-विशिष्ट-केन्द्रस्य अध्यक्षेण प्राचार्येण गिरीशनाथ-झा**-वर्येण पीपीटी-माध्यमेन संगणकीय-भाषाविज्ञान-क्षेत्रे संस्कृतमाधृत्य विधीयमानानि कार्याणि विशदीकृतानि। अवसरेऽस्मिन् तेन एतदपि प्रदर्शितं यत् न केवलं भारतीय-भाषाणाम्, अपि च, कासाञ्चन योरोपीय-भाषाणामपि पोषिकास्ति पाणिनीया संस्कृत-भाषा। आधुनिकं संगणकीय-भाषाविज्ञानं साम्प्रतं सन्दर्भेऽस्मिन् अनेकाः शोध-परियोजनाः अङ्गीकृत्य सुबहूनि कार्याणि विदधाति। एतदनु स्पर्धा-द्वयं 'श्लोकोच्चारणं प्रश्नमञ्चेति' सम्पन्नम्, ययोः विभिन्न-महाविद्यालयीयच्छात्रैः छात्राभिश्च सोत्साहं सहभागित्वं निर्व्यूढम्। निर्णायक-त्रयेण बलदेवानन्द-सागर-पंकजमिश्र-विकासेति स्पर्धाद्वयस्य निर्णायक-भूमिका अनुष्ठिता। समग्रमपि कार्यक्रम-संयोजनं **डॉ. कौशल्या**-महाभागया सुष्ठुतया सम्पादितम्।

वृत्तप्रेषकः - **डॉ. बलदेवानन्द-सागरः**

क्षम्यताम्!

अमेरिकादेशे अन्तरिक्षसंशोधनकेन्द्रे (NASA मध्ये व्यक्तिगतरूपेण भवतु नाम) आर्यभटभास्करवराहमिहिरादीनां भारतीय-ज्योतिर्विज्ञानिनां ग्रन्थानाम् आलोडनं प्रचलति इत्येव वार्ताकणस्य परगुणपरमाणूनां मित्रभावनया पर्वतीकरणं भूत्वा वृत्तमिदं प्रायः सर्वत्र प्रसृतमस्ति। तस्यैव पुनर्मुद्रणम् अस्मिन् वृत्तपत्रे सञ्जातम्। वृत्तस्यास्य साक्षात् तस्मात् देशात् विश्वासपूर्णेन वास्तवमनेन पाठकपत्रेण सुस्पष्टम् अभवत्।

- सम्पादकमण्डलम्

संस्कृत-भाषा-प्रचारिण्याः सभायाः इदं साप्ताहिकं डॉ. चन्द्रगुप्त वर्णेकरः इत्यनेन सभायाः सचिवेन कृष्णचंद्र एजन्सीज, नागपुरम् इत्यत्र मुद्रापयित्वा संस्कृत-भवने २, पश्चिम-उच्च-न्यायालय-मार्ग, नागपुरे प्रकाशतां नीतम्।